“ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते” इति भगवदुक्तेस्तात्पर्यनिरूपणम्

शुभदीपदासः *

Abstract

[श्रीमद्भगवद्गीतायां चतुर्थाध्याये ज्ञानस्य सर्वपापविनाशकत्वं समुपवर्ण्यते । ज्ञानम् उभयोः धर्माधर्मयोः निवर्तकम् इत्याह स्वयं भगवान्– “ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते” इति । ज्ञानरूपाग्निः सर्वाणि कर्माणि भस्मीकरोतीति सामान्यार्थः । दाहो हि निर्बीजीकरणम् । आत्मज्ञानम् अज्ञानं निवर्तयत् तज्जन्यं कर्तृत्वभ्रमं निवर्तयति । अयं कर्तृत्वभ्रमः सर्वेषां कर्मणां बीजभूतः । अतः ज्ञानेन सर्वकर्मणां समूलं नाशो भवतीति गम्यते । ननु ज्ञानेन सर्वकर्महेतुभूतस्य कर्तृत्वभ्रमस्य नाशे येन कर्मणा विदुषः शरीरमारब्धं तस्यापि नाश इति ज्ञानोदयसमकालमेव शरीरपाते आचार्याभावः स्यात्, आचार्याभावे च ज्ञानानुत्पत्तौ मोक्षशास्त्रस्य अप्रामाण्यं प्रसज्येत । अतः प्रकृतश्लोकस्य योऽर्थः प्रोक्तः तस्य सङ्कोचः सिद्धान्ते क्रियते । ज्ञानं प्रारब्धकर्माणि विहाय अन्यानि यानि कर्माणि सन्ति तानि सर्वाण्यपि कर्माणि तद्बीजभूतस्य कर्तृत्वभ्रमस्य निराकरणेन नाशयति इति श्लोकस्य तात्पर्यार्थः अभ्युपगम्यते ।]

कुञ्चिकाशब्दाः— ज्ञानम्, प्रारब्धकर्म, सञ्चितकर्म, मोक्षः, कर्तृत्वभ्रमः ।

वासुदेवमुखनिःसृतायाः श्रीमद्भगवद्गीतायाः ज्ञानकर्मसन्न्यासयोगाख्ये चतुर्थाध्याये तत्त्वदर्शिभिराचार्यैरुपदिश्यमानं निखिलसंसारबन्धविनाश-हेतुभूतं ज्ञानं सफलं विचारितम् । तत्र ज्ञानस्य माहात्म्यं वर्णयता तस्य सर्वपापविनाशकत्वं भगवता प्रतिपादितम्— “अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः” [श्रीमद्भगवद्गीता ४.३६] इत्यादिश्लोकेन । सर्वेभ्यः पापकारिभ्यो योऽतिशयेन पापकारी तस्यापि पापानि इदं ज्ञानं नाशयतीति श्लोकाभिप्रायः । इदमत्रावधेयम्, अध्यात्मशास्त्रे पापशब्देन अधर्माधर्मौ उभावपि ग्राह्यौ मुमुक्षोः धर्मस्यापि पापत्वात् ।[१] तेन धर्मानुष्ठातॄणां ज्ञानेन अधर्मनाशेऽपि धर्मरूपप्रतिबन्धकसत्त्वात् मोक्षो न सम्भवतीति शङ्का न कार्या । एवं ज्ञानेन धर्माधर्मयोरुभयोर्निवृत्तिर्भवतीति प्राप्तम् । इदं ज्ञानस्य

---

* शोधच्छात्रः, संस्कृतदर्शनविभागे, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थाने, वेलुडमठे, पश्चिमवङ्गेषु ; Email : subhadeep.das.vedvid@gmail.com

[१] “धर्मोऽपि इह मुमुक्षोः पापम् उच्यते”—श्रीमद्भगवद्गीताशाङ्करभाष्यम्, पृ. २५१

धर्माधर्मविनाशकत्वं सदृष्टान्तं प्रतिपिपादयिषन्नाह भगवान्वासुदेवः—

यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन ।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥

[श्रीमद्भगवद्गीता ४.३७]

यथा प्रदीप्तः अग्निः काष्ठानि भस्मीभूतानि करोति तथा ज्ञानरूपाग्निः सर्वाणि कर्माणि भस्मीभूतानि करोतीति श्लोकार्थः । अत्रायं विशेषः, यथाग्नेः दाहकत्वं काष्ठानां च तद्दाह्यत्वं सम्भवतस्तथा ज्ञानस्य दाहकत्वं कर्मणां च तद्दाह्यत्वं न सम्भवतः । तस्माद् दार्ष्टान्तिके दाहस्य निर्बीजीकरणमित्यर्थः स्वीकर्तव्यः । यथा लौकिकज्ञानं स्वप्रमेयावरणाज्ञानं निवर्तयति तथा प्रकृतमिदम् आत्मज्ञानमपि अज्ञानं निवर्तयत् तज्जन्यकर्तृत्वभ्रमं निवर्तयति । अयं कर्तृत्वभ्रमः सर्वेषामपि कर्मणां बीजभूतः । अतस्तस्य निराकरणेन कर्मणां निर्बीजीकरणमेव सञ्जातमित्याशयः । एवं ज्ञानेन सर्वेषामपि कर्मणां समूलं नाशो भवतीति प्राप्तम् ।

ननु ज्ञानेन सर्वकर्महेतुभूतस्य कर्तृत्वभ्रमस्य नाशे येन कर्मणा विदुषः शरीरमारब्धं तस्यापि कर्मणो नाशो भवतीति ज्ञानोदयसमकालमेव तस्य शरीरपातः स्यात् । तदा तत्त्वदर्शिनामाचार्याणामेव अभावात् तत्त्वदर्शिभिरुपदिष्टं ज्ञानं सफलमिति भगवद्वचनम्[२] "आचार्यवान्पुरुषो वेद" [छान्दोग्योपनिषत् ६.१४.२] इत्यादिश्रुतिवचनं च नोपपद्येते । किञ्च, आचार्याभावे ज्ञानानुत्पत्तौ ज्ञानात् मोक्ष इति शास्त्रमपि[३] अप्रमाणं स्यात् । ननु ज्ञानात् मोक्षः सर्वेषां न भवति । केषाञ्चिदेव स भवति । येषां न भवति तेषामेव आचार्यत्वमिति नाचार्याभाव इति चेन्न, नियतफलत्वात् ज्ञानस्य केषाञ्चित् ज्ञानफलं लभ्यते केषाञ्चिच्च न लभ्यते इति वक्तुं न शक्यते । किञ्च, कस्यचित् ज्ञानात् मोक्षः कस्यचिन्न इति स्वीकृते ज्ञानस्य अनियतफलत्वेन न कश्चित् मोक्षाय प्रवर्तेत । तस्मात् ज्ञानेन सर्वकर्मनाशासम्भवात् "ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते" [श्रीमद्भगवद्गीता ४.३७] इति भगवता यदुक्तं तद् अनुपपन्नं प्रतिभाति ।

एतामापाततः प्रतिभासमानामनुपपत्तिं निरसयितुकामाः सिद्धान्तिनः

---

[२] "ये सम्यग्दर्शिनः तैः उपदिष्टं ज्ञानं कार्यक्षमं भवति नेतरत् इति भगवतो मतम्"—श्रीमद्भगवद्गीताशाङ्करभाष्यम्, पृ. २४९

[३] "तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" [श्वेताश्वतरोपनिषद् ३.८]

कर्मसु कानिचित् प्रवृत्तफलानि कानिचित् अप्रवृत्तफलानि इति कर्मणां द्वैविध्यं प्रतिपादयन्ति । तत्र यानि कर्माणि जन्मान्तरेषु सञ्चितानि यानि च अस्मिन् जन्मनि ब्रह्मज्ञानोत्पत्तेः प्राक् सञ्चितानि तथा ज्ञानाभ्यासकाले कृतानि गुरुसेवादिरूपाणि तानि सर्वाण्यपि अप्रवृत्तफलानि कर्माणि ब्रह्मज्ञानेन विनाशं प्राप्नुवन्ति । परन्तु येषां कर्मणां फलभोगः आरब्धः यैश्च ब्रह्मज्ञानाश्रयोऽयं देहः निर्मितः तेषां प्रवृत्तफलानां कर्मणां विनाशो भोगेनैव भवति "तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये" [छान्दोग्योपनिषत् ६.१४.२] इति श्रुतेः । तस्य उत्पन्नविद्यस्य पुरुषस्य तावदेव चिरं विलम्बः यावन्न विमोक्ष्ये शरीरपातो न स्यात् । अथ शरीरपातानन्तरं सम्पत्स्ये ब्रह्म भवति इति श्रुत्यर्थः । अत्र श्रुतौ विद्योत्पत्तिसत्सम्पत्त्योर्मध्ये विलम्बस्योक्तत्वात् तच्छरीरारम्भकाणां प्रारब्धकर्मणां भोगं विना अनिवृत्तिर्गम्यते । "नाभुक्तं क्षीयते कर्म"[४] इत्यादिस्मृतयोऽपि प्रारब्धकर्म एव विषयीकुर्वन्त्यस्तस्य भोगं विना क्षयाभावं बोधयन्ति । तस्माद्यथा चापाल्लक्ष्यं प्रति निर्गतः शरो मध्ये न निवर्तते, लक्ष्यं प्राप्यैव निर्व्यापारो भवति तथा प्रारब्धं कर्म यावद्देहपातं न नश्यति । किन्तु यथा तूणस्थाः अथवा धनुषि संयोजिता अपि अप्रयुक्ताः शराः लक्ष्यप्राप्तिं विना निवारयितुं शक्यन्ते तथा सञ्चितानि कर्माण्यपि भोगप्रदानं विना ज्ञानेन नाशयितुं शक्यन्ते ।

ननु अग्निना बीजानां सम्बन्धे सति केषाञ्चित् बीजानाम् अङ्कुरोत्पादिका शक्तिर्नश्यति केषाञ्चित् न नश्यति इति यथा स्वीकर्तुं न शक्यते तथा ब्रह्मज्ञानेन कानिचित् कर्माणि विनश्यन्ति कानिचित् न विनश्यन्ति इत्यपि स्वीकर्तुं न शक्यते इति चेदुच्यते, यथा सकलान्धकारनिवर्तनसमर्थोऽपि सविता अपवरकप्रतिबन्धात् तदाश्रयम् अन्धकारं न नाशयति तथा सकलसंसारबीजभूताज्ञाननिवर्तनसमर्थोऽपि ब्रह्मज्ञानदिवाकरः प्रवृत्तफलकर्मप्रतिबन्धात् तत्सम्पादकम् अज्ञानलेशं न नाशयति । तस्मात् प्रारब्धकर्मणां भोगेनैव क्षयात् ज्ञानोदयात् शरीरपातं यावत् विदुषः स्थितेः तत्त्वदर्शिन आचार्याः समुपलभ्यन्ते । तेन "उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः" [श्रीमद्भगवद्गीता ४.३४] इति भगवद्वचनम् "आचार्यवान्पुरुषो वेद" [छान्दोग्योपनिषत् ६.१४.२] इति श्रुतिवचनं चोपपद्येते तथा ज्ञानान्मोक्षः इति शास्त्रस्यापि अप्रामाण्याशङ्का निवर्तते ।

[४] नीतिसारः

किञ्च, यस्य कर्मणः फलभोगः समारब्धः तदनाश्रित्य ब्रह्मज्ञानोत्पत्तिर्नोपपद्यते । यतो हि तस्य कर्मणो ब्रह्मज्ञानं प्रति हेतुत्वं वर्तते । यथा कुलालचक्रस्य वेगः प्रवृत्तश्चेत् मध्ये तस्य प्रतिबन्धासम्भवात् वेगक्षयं यावत् चक्रवेगः प्रवर्तते तथा भोगः समारब्धश्चेत् तस्य क्षयं यावत् प्रारब्धकर्मणो वेगः प्रवर्तते । किञ्च, यद्यपि ब्रह्मविदः स्वदृष्टौ अकर्तृस्वरूपं ब्रह्माहमस्मि इति ज्ञानं मूलाज्ञानस्य बाधेन सर्वाणि कर्माणि नाशयति[५] तथापि परदृष्टौ बाधितमपि तत् मिथ्याज्ञानं किञ्चित्कालमनुवर्तते यथा उपदेशे कृतेऽपि बालकस्य द्विचन्द्रज्ञानं संस्कारवशात् किञ्चित्कालमनुवर्तते । तस्मात् परदृष्टौ प्रारब्धकर्मणां नाशाभावात् ब्रह्मविदा तस्य भोगः क्रियते । अपि च, ब्रह्मविदा शरीरधारणं क्रियते न वा इत्यस्मिन् विषये विवादो न कर्तव्यः । यतो हि एकस्य हृदये प्रतीयमानं ब्रह्मविज्ञानं शरीरधारणं वा अन्येन प्रत्याख्यातुं न शक्यते । किञ्च, शास्त्रेषु स्थितप्रज्ञस्य लक्षणनिर्देशेन ब्रह्मविदः शरीरधारणमेव निरूपितम् । तस्मात् सञ्चितानामेव कर्मणां ब्रह्मविद्यया क्षयो भवति, न तु प्रारब्धानामिति सिद्धान्तः ।

उपसंहारः

इत्थं प्रारब्धकर्मणां भोगं विना नाशायोगात् "ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते" [श्रीमद्भगवद्गीता ४.३७] इति भगवदुक्तौ सर्वशब्दार्थः सङ्कोचयितव्यः । तेन ज्ञानरूपाग्निः प्रारब्धकर्माणि विहाय अन्यानि यानि कर्माणि सन्ति तानि सर्वाण्यपि कर्माणि तद्बीजभूतस्य कर्तृत्वभ्रमस्य निराकरणेन नाशयति इति श्लोकतात्पर्यं ग्राह्यमिति शम् ।

✶ ✶ ✶

Bibliography

1. *उपनिषद्भाष्यम्* (खण्डः- १) ; शङ्कराचार्यः ; श्री एस. सुब्रह्मण्यशास्त्री (सम्पादकः) ; श्री दक्षिणामूर्ति मठ प्रकाशन ; वाराणसी ; २०११ ।
2. *उपनिषद्भाष्यम्* (खण्डः- २) ; शङ्कराचार्यः ; श्री एस. सुब्रह्मण्यशास्त्री (सम्पादकः) ; श्री दक्षिणामूर्ति मठ प्रकाशन ; वाराणसी ; २०११ ।
3. *उपनिषद्भाष्यम्* (खण्डः- ३) ; शङ्कराचार्यः ; श्री एस. सुब्रह्मण्यशास्त्री (सम्पादकः) ; श्री दक्षिणामूर्ति मठ प्रकाशन ; वाराणसी ; २०११ ।

[५] "क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे" [मुण्डकोपनिषद् २.२.९]

4. *ब्रह्मसूत्रशाङ्करभाष्यम्;* शङ्कराचार्यः ; आचार्यजगदीशशास्त्री (सम्पादकः) ; मोतीलाल बनारसी दास ; दिल्ली ; २०१८ ।
5. *श्रीमद्भगवद्गीताभाष्यम्* (प्रथमः खण्डः) ; शङ्कराचार्यः ; श्रीमणिद्राविडः (सम्पादकः) ; श्रीदक्षिणामूर्तिमठप्रकाशनम् ; वाराणसी ; २०१६ ।
6. *श्रीमद्भगवद्गीताभाष्यम्* (द्वितीयः खण्डः) ; शङ्कराचार्यः ; श्रीमणिद्राविडः (सम्पादकः) ; वाराणसी- श्रीदक्षिणामूर्तिमठप्रकाशनम् ; वाराणसी ; २०१६ ।
7. *वेदान्तदर्शनम्* (१) ; स्वामिविश्वरूपानन्दः ; स्वामिचिद्घनानन्दपुरी (सम्पादकः) ; उद्बोधन कार्यालय ; कोलकाता ; २०२० ।
8. *वेदान्तदर्शनम्* (२) ; स्वामिविश्वरूपानन्दः ; स्वामिचिद्घनानन्दपुरी (सम्पादकः) ; उद्बोधन कार्यालय ; कोलकाता ; २०२० ।
9. *वेदान्तदर्शनम्* (३) ; स्वामिविश्वरूपानन्दः ; स्वामिचिद्घनानन्दपुरी (सम्पादकः) ; उद्बोधन कार्यालय ; कोलकाता ; २०२० ।
10. *वेदान्तदर्शनम्* (४) ; स्वामिविश्वरूपानन्दः ; स्वामिचिद्घनानन्दपुरी (सम्पादकः) ; उद्बोधन कार्यालय ; कोलकाता ; २०२० ।

✳ ✳ ✳